# RAMAKRISHNA MISSION VIDYAMANDIRA

(Residential Autonomous College affiliated to University of Calcutta)

**B.A./B.Sc. SECOND SEMESTER EXAMINATION, MAY 2016**

**FIRST YEAR [BATCH 2015-18]**

Date : 23/05/2016 **SANSKRIT (General)**

Time : 11 am – 2 pm **Paper : II** Full Marks : 75

1. **एकस्य** प्रस्नस्योत्तरं लेख्यम्। [1×10]
   a) स्वप्नवासवदत्तनाटके प्रतिफलितं यौगन्धरायणचरित्रम् आलोचनीयम्।
   b) स्वप्नवासवदत्तनाटकम् अवलम्ब्य वासवदत्ताचरित्रम् उपस्थापनीयम्।

2. वङ्गभाषया आङ्गलभाषया वा पद्य**स्यैकस्य** अनुवाद: करणीय:। [1×5]
   a) अनाहारे तुल्य: प्रततरुदितक्षामवदन:
      शरीरेऽसंस्कारं नृपतिसमदु:खं परिवहन्।
      दिवा वा रात्रौ वा परिचरति यत्नैर्नरपतिं
      नृप: प्राणान् सद्यस्त्यजति यदि तस्याप्युपरम:।।
   b) कार्यं नैवार्थैर्नापि भोगैर्न वस्त्रै—
      र्नाहं काषायं वृत्तिहेतो: प्रपन्न:।
      धीरा कन्येयं दृष्टधर्मप्रचारा
      शक्ता चारित्रं रक्षितुं मे भगिन्या:।।

3. सप्रसङ्गं व्याख्यायतां पद्य**मेकम्**। [1×6]
   a) नैवेदानीं दु:खिताश्चक्रवाका
      नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ता:।
      धन्या सा स्त्री यां तथा वेत्ति भर्ता
      भर्तृस्नेहात् सा हि दग्धाप्यदग्धा।।
   b) प्रद्वेषो बहुमानो वा संकल्पादुपजायते।
      भर्तृदाराभिलाषित्वादस्यां मे महती स्वता।।

4. प्रश्न**द्वयस्य** उत्तरं लेख्यम्। [2×2]
   a) महासेन: क: ?
   b) कौतुकमालिकारचनाकाले वासवदत्ता किम् औषधं त्यक्तवती ? त्यागे को हेतु: प्रदर्शित: ?
   c) शीर्षवेदनया का दु:खिता आसीत् ? तस्या: कृते कुत्र शय्या आस्तीर्णा ?
   d) का नदी 'त्रिपथगा' इत्युच्यते ? कस्मात् हेतो: ?

5. **एक**स्यैव प्रश्नस्योत्तरं लेख्यम्। [1×10]
   a) कालिदासमनुसृत्य सुदक्षिणया सह दिलीपस्य वशिष्ठाश्रमगमनं वर्णनीयम्।
   b) महाकाव्यरचयितृरूपेण संस्कृतसाहित्यजगति कालिदासस्य स्थानं निर्णेयम्।

6. वङ्गभाषया आङ्गलभाषया वा पद्य**स्यैकस्य** अनुवाद: कार्य:। [1×6]
   a) वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
      जगत: पितरौ वन्दे पार्वतीपरमेश्वरौ।।
   b) ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्यय:।
      गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव।।

7. पद्य**मेकं** सप्रसङ्गं व्याख्येयम्। [1×8]

a) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।।

b) तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा।।

8. प्रश्न**त्रयस्य** उत्तरं लेख्यम्। [3×2]

a) दिलीपस्य प्रजाभ्यः करग्रहणप्रकारः कीदृश आसीत्?
b) कौ उभौ सम्पद्विनिमयेन किं भुवनद्वयं दधतुः?
c) दिलीपः केन प्रकारेण कीदृशीम् उर्वीं शशास?
d) किं नाम हैयङ्गवीनम्?
e) कानि तावद् राज्यस्य सप्त अङ्गानि?
f) कास्तावत् षड् ईतयः?

9. **पञ्चा**नामेव पदानां सव्यासवाक्यं समासनामानि लेख्यानि। [5×2]

| | | | |
|---|---|---|---|
| a) नीलाम्बरः | b) यथायुक्ति | c) छागदुग्धम् | d) कुम्भकारः |
| e) दानवीरः | f) दुर्भिक्षम् | g) किंसखा | h) विद्यामन्दिरम् |

10. स्वेच्छया **षण्णा**मेव परिणतरूपाणि लेख्यानि। [6×1]

| | | | | |
|---|---|---|---|---|
| a) दशरथ + अण् | b) लक्ष्मी + मतुप् | c) √पच् + तुमुन् | d) √यज् + क्त | e) √कृ + तव्य |
| f) √नी + ल्युट् | g) √मृ + अनीयर् | h) √शी + शानच् | i) √दृश् + सन् + लट्–ते | j) वि–√जि + ल्यप् |

11. वाक्यरचनया यस्य कस्यापि युगल**द्वय**स्य अर्थपार्थक्यं प्रदर्शनीयम्। [2×2]

| | | | |
|---|---|---|---|
| a) आम्रः, आम्रम् | b) उच्चरति, उच्चरते | c) यवनी, यवनानी | d) अर्थी, अर्थवान् |

——————— × ———————